Shri Raghunath Temple MSS. Library,
JAMMU

No. ४२९२

Title श्राद्ध दीपिका १ माध्यायस्य २ प. ३ प. ४र्थ पादाः

Author श्री रविरुद्रदेवः

Extent २८ Age ____

Subject मीमांसा शास्त्रं

भाट्टदीपिका प्रथमाध्याय द्वितीय तृतीय चतुर्थ पादाः

४२४२

मीमांसाभाट्ट दीपका

६५॰

भा [illegible]ाट्ट दीपिका। प्रथमाध्यायः

भा० १

श्रीगणेशाय नमः॥ ॥विश्वेश्वरं नमस्कृत्य खंडदेवः सतां मुदे। तनुते तत्प्रसादेन संक्षिप्तां भाट्टदीपिकां॥ आ
म्नायस्य। वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्याद्यर्थवादानां वि
धिप्रतिषेधवदेव कर्तृस्मरणाभावादपौरुषेयत्वे पूर्वाधिकरणेन सिद्धे संप्रति तद्वदेवं धर्मयोः प्रामाण्यम धर्मा
स्ति न वेति विचार्यते। तत्र विधिप्रतिषेधवाक्याभ्यां साध्यसाधनेतिकर्तव्यताविशिष्टभावनाविषयकविधि
प्रतिषेधयोः प्रतिपादनादर्थात् विधिप्रतिषेधविषययागादेरिष्टानिष्टसाधनत्वाक्षेपाद्युक्तं तयोरिष्टा
निष्टसाधनरूपधर्माधर्मप्रमाजनकत्वं। अर्थवादानां तु शक्त्या सदसद्रूपसिद्धार्थबोधकत्वान्न धर्माधर्मयोः
प्रामाण्यसंभवः। न च शक्त्या तदसंभवेपि लक्षणाध्याहारादिना तत्प्रतिपादनं। यथाश्रुतार्थप्रतिपादने
नैवोपपत्तौ अन्वयानुपपत्त्यभावेन तदसंभवात्। न च तात्पर्यानुपपत्त्या तत्कल्पनं। तात्पर्यग्राहकाभा १
वेन तस्याप्यसंभवात्। न हि शब्दः प्रमाणमात्रं वा प्रयोजनवद्विषयमेवेत्येवं नियमे प्रमाणमस्ति। येन स

एवंतात्पर्यमाह कः शंकेत निःप्रयोजनानामपि वक्रशोदर्शनेनव्यभिचारात्।नचस्वाध्यायोध्येतव्य इ
तिस्वाध्यायविधिरेवार्थज्ञानोद्देशेनाध्ययनंविदधन्निःप्रयोजनार्थज्ञानस्यभाव्यत्वानुपपत्तेरर्थस्यप्रयो
जनवत्वमाक्षिपतीतिवाच्यं।अर्थज्ञानजनकत्वेनाध्ययनस्यलोकसिद्धत्वेनाविधेयत्वात्।तन्नियमस्य
चार्थज्ञानेनुपयोगात्।अव्यभिचरितक्रतुसंबंधाभावेनक्रत्वर्थयावदुपयोगकल्पनानुपपत्तेश्चनविधेयत्वं।
अतःस्वाध्यायविधिनास्वर्गाद्यर्थमेवाध्ययनंविधीयते।लोकतःपूर्वंप्रवृत्त्यंगीकारेणयथाश्रुतार्थज्ञाना
र्थंवा।अध्ययनमेववाभावनायांभाव्यमस्तु।नचैवमिष्टभाव्यकत्वाभावात्प्रवृत्त्यनुपपत्तिः।अनधीया
नाव्रात्याभवंतीतिवचनेनाकरणेप्रत्यवायबोधनेनापिप्रवृत्तिसिद्धेः।अतस्तस्यवेदत्वावच्छेदेनप्रयोजन
वद्विषयत्वानाक्षेपकत्वान्नार्थवादेषुतद्वत्वेनलक्षणादिसिद्धिरित्यप्रमाणमर्थवादाधर्माधर्मयोरितिप्राप्ते
भिधीयते।नस्वाध्यायविधिःस्वर्गाद्यर्थमध्ययनंविधत्ते।दृष्टेसंभवत्यदृष्टस्यान्याय्यत्वात्।नापियथाश्रुता

भा० थज्ञानार्थं। तथात्वेश्वात्यतावोधकवात्सेनाध्ययनस्यावश्यकत्वान्न्हीतेंपदार्थसंगतिकस्यस्यापक्ररयंभार पद
२ मूद हारः किलोयंमधीत्यवेदंनविजानातियोर्थमित्यादिवचनाच्चज्ञानस्याप्यावश्यकत्वेनयथाकृतार्थज्ञानस्या
नुषंगिकतयापिसिद्धेःस्वाध्यायविधिवैयर्थ्यप्रसंगात्‌ एतेनाध्यायनभावकत्वपक्षोपिनिरस्तः। अतोवै
यर्थ्यपरिहारार्थंप्रयोजनवदर्थज्ञानाद्युद्देशेनस्वाध्यायाध्ययनंविधीयतेप्रयोजनवदर्थज्ञानादिसाधनी
भूतस्वाध्यायोद्देशेनवाध्ययनमात्रं। तव्यप्रत्ययेनस्वाध्यायस्यकर्मत्वाभिधानात्‌। अनश्चस्वाध्यायार्थस्य
प्रयोजनवत्वसिद्धेस्तात्पर्यग्राहकवशेनलक्षणा अर्थवादेषु। लक्षणीयश्चार्थःसंन्निहितविधिनिषे
धापेक्षितत्वात्स्तुतिनिंदारूपः। तथाहि। लिङाद्यर्थोलोकेपुरुषाशयः। वेदेतदभावाल्लिङादिनिष्ठए
वकश्चिद्धर्मःवाच्यतावच्छेदकंचोभयसाधारणंव्यापारत्वंनतुप्रवृत्तिनिवृत्तिप्रयोजकत्वमपि। तस्यान्यलभ्य
त्वात्‌। तत्रनञोभावेआख्यातार्थप्रवृत्तिप्रयोजकत्वंनत्सत्वेतुतदर्थप्रवृत्त्यभावप्रयोजकत्वंसंसर्गइतिवि २

शेषः प्रयोजकत्वं चात्र प्रवृत्तितदभावकारणीभूतेष्टानिष्टसाधनताज्ञानजनकज्ञानविषयत्वं अभावका
रणता च योगक्षेमसाधारणी तत्त्वं च प्रवृत्तिसामग्रीविघटकत्वमित्यन्यत्र विस्तरः स च लिङाद्यर्थो विधि
वाक्ये प्रवर्त्तना प्रेरणा विध्यपरपर्यायः निषेधवाक्ये च निवर्त्तना निवारणा निषेधप्रतिषेधापरपर्यायः।
इयं च द्विविधापि शाब्दी भावना तस्याश्च भाव्ये यथायोगं प्रवृत्तिनिवृत्ती शाब्दभावनाज्ञानं करणं कर
णत्वं चात्र भावनाभाव्यनिःपादकत्वं इतिकर्त्तव्यता च यथायोगं स्तुतिनिंदे। स्तुतिनिंदाज्ञान
स्य हि प्रवृत्तिनिवृत्तिप्रयोजकसहकारित्वं रुच्यरुच्युत्पादनद्वारा लोकसिद्धं। स्तुतिनिंदापदवाच्ये
प्राशस्त्याप्राशस्त्यापरपर्याये बलवदनिष्टाननुबंधितानुबंधित्वयोग्यत्वरूपे। ते च यथायोगं
विधिनिषेधापेक्षितत्वात्तत्समभिव्याहृतार्थवादैर्लक्षणया प्रतिपाद्येते। तत्र वायुर्वै क्षेपिष्ठेत्यादे
स्वशाक्षेपिष्ठत्वादिगुणैरेव लक्षणा यजमानः प्रस्तर इत्यादौ तु गौणी। गम्यस्य स्वकार्यकर्तृत्वादिगुणे

भा० रितिवक्ष्यते। अतः सिद्धं भावनान्वितस्तुतिनिंदाविषयकप्रमाजनकत्वेनार्थवादानां धर्माधर्मयोः प्रमा
३ णयमिति। प्रयोजनं तु पूर्वपक्षेऽर्थवादानुपस्थितप्राशस्त्यज्ञानादपि प्रवृत्तौ फलसिद्धिः सिद्धांते तु मं
त्रवदर्थवादानामेव प्ररोचकत्वनियमात्तदुपस्थितप्राशस्त्यज्ञानादेव प्रवृत्तौ सेति द्रष्टव्यं॥ ॥वि
3 धिर्वा॥ ॥औदुंबरो यूपो भवतु ऊर्ग्वा उदुंबर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोऽवरुध्या इत्याद्य
र्थवादेषु नस्तुतिलक्षणा। शक्त्यैव यूपस्य फलसंबंधविधायकत्वेन प्रामाण्योपपत्तेः पशूनिति द्विती
यया ऊर्जोऽवरुध्या इति चतुर्थ्या वा पशूनां साध्यत्वे वगते साधनापेक्षत्वादौदुंबरत्वं साधनं संनिधाना
त् ऊर्जैतितृतीयाश्रवणाच्च। भवतीत्याख्यातेन च लक्षणया शक्त्यैव वा भावनाभिधानाद्भूधातोः यूपो सा
दकच्छेदनाद्यनुवादकत्वाद प्राप्तार्थत्वेन चलेट्त्वनिश्चयात् उभयविशिष्टभावनाविधायकत्वोपपत्तिरित्या ३
क्षेपप्राप्तेयूपकर्तृकभवनाक्षिप्तायां भावनायां यूपस्यैव भाव्यत्वौचित्यात् संनिधानाच्च यूपोद्देशेनैवौदुंब

रत्वविधिर्नतुफलोद्देशेनकामशब्दाद्यभावेनफलत्वस्यार्थतेथानुपस्थितेः।। किंचभवन्मतेगुणफलसंबंधोयं।न
चासौसंभवतिआश्रयालाभात्।सौमापौष्णंचैत्रंतमालभेतपशुकामइतिप्रकृतस्ययागस्याश्रयत्वेहि
रूपग्रहणानुपपत्तिः।रूपस्यतुअप्रकृतत्वादेवाश्रयत्वानुपपत्तिः।अतिदेशेनतस्योपस्थितिस्तुजु
ह्वादिपात्रांतरसाधारणेतितेषामप्याश्रयत्वेतथैवरूपग्रहणानर्थक्यं।वाक्येनाश्रयदानेचवाक्यभेदः।त
स्मादूर्ग्वाउदुंबरइत्यादिरर्थवादएवौदुंबरत्वस्येतिसिद्धं।प्रयोजनंयागफलात्फलांतरकामनायामौदुं
बरोयूपइतरथाखादिरःपूर्वपक्षेसिद्धांतेतुऔदुंबरएवेति।। ।।हेतुवत्।। ।।चातुर्मास्येषुशूर्पेणजुहोती
तिशूर्पकरणकंहोमंविधायस्कतेननतेनह्यन्नंक्रियतइत्यर्थवादेननस्तुतिलक्षणाअपितुहोमसाधनत्वे
साधनेष्वन्नकरणत्वस्यहेतुत्वंविधीयते।नचात्रपूर्वत्रभाव्यत्ववत्किंचित्कल्पनीयमस्तिहिशब्दश्चैतस्यैवहेतुत्वा
भिधानात्।हेतुश्चव्याप्तिमंतरेणानुपपन्नोयद्यदन्नकरणंतेनतेनहोतव्यमितिव्याप्तिवचनंकल्प्यतइतिततश्चशू

र्पादन्यस्यापिद्दर्विपिठरादेर्होमसाधनत्वप्रतीतेर्विधौ शूर्पपदमुपलक्षणमेव स्यात्सानुवादोवा। यद्वातच्छ
ब्देन शूर्पस्यैव परामर्शात्तत्रतमेवान्नकरणत्वं हेतुः। तेन च विशिष्यैव व्याप्तिकल्पनादन्नकरणासमर्थ
शूर्पव्यावृत्तावपि न विधिस्थशूर्पपदंअन्यथानेयमिति विःरवर्प[redacted]क्षः सिद्धांतस्तु क्रियत इति लडंतनिर्दे
शाद्वर्त्तमानान्नकरणत्वस्य हेतुत्वं वाच्यं। न च होमकालेऽन्नकरणत्वं संभवति। अतो लटा भूतभ
विष्यत्कालांतरलक्षणा विधौ तवाप्यावश्यकी यद्यपि चेयं प्राशस्त्यलक्षणोपयोगिगुणघटकतयामप्या
वश्यकी तथापि अनुवादस्य त्वात्प्राशस्त्यपोषकत्वाच्चसानदोषः वर्त्तमाननिर्देशं विना तदप्रतीतेः। किं
चापेक्षितप्राशस्त्यपरत्वे संभवति नानपेक्षितहेतुपरत्वांगीकारो युक्तः अतः सिद्धं सर्वेषामर्थवादानांस्ता
वकत्वेन प्रामाण्यं॥ ॥तदर्थशास्त्रात्॥ ॥मंत्राणां धर्माधर्मयोः प्रमाण्यमस्ति न वेति चिंतायां न तावद्विधित्वेन ४
प्रामाण्यं। तस्य द्वितीये निराकरिष्यमाणत्वात्। नापि स्तावकत्वेनार्थवादवत्। तेषां हि संन्निहितेन विधिना।

पदैकवाक्यत्वाद्युक्तं स्वसमर्पितप्राशस्त्यान्वितभावनाविषयकशाब्दप्रमाजनकत्वं। मंत्राणां तु दूरस्यते
न पदैकवाक्यत्वानुपपत्तेर्न तद्विधया प्रामाण्यसंभवः। नापि प्राशस्त्यं स्वातंत्र्येण वाक्यार्थः पदार्थविधयोपस्थित
त्वात्। नापि अर्थस्मारकत्वेन प्रामाण्यं अनधिगतार्थबोधकत्वाभावेन तदसंभवात्। साममंत्राणामर्थाभावेन
याथार्थ्यस्याप्यनुपपत्तेश्च। न च प्रामाण्याभावेपि स्मारकत्वादिना प्रयोजनवत्त्वमात्रांगीकारः। ध्यानाद्युपायांत
रेणापि स्मृतिसिद्धेर्नियतमंत्राम्नानवैयर्थ्यात्। प्रयोगासमवेतार्थस्मारकेषु स्मृतिवैयर्थ्याच्च। अतो अधिकारा
ख्यप्रकरणादिनावगततत्तत्क्रत्वंगभावानां मंत्राणामुच्चारणमात्रमदृष्टार्थं विधीयते स्वाध्यायविधिश्चो
च्चारणोपयोगिप्रयोगप्रास्तुभावफलकतयैवाध्ययनं विधत्त इति न कश्चिद्दोष इति प्राप्तेभिधीयते दृष्टे
संभवत्यदृष्टकल्पनानुपपत्तेः प्रयोगसमवेतार्थस्मृतिरेव संभवतां मंत्राणां प्रयोजनं असंभवतां तु का
मं भवत्वदृष्टं प्रयोजनं। शक्यते तु तत्रापि मंत्राणां अर्थप्रकाशनार्थोः प्रकाशनं परमदृष्टार्थमिति वक्तुं। सा

भा० म्नांतु अक्षराभिव्यक्तिरेवादृष्टं प्रयोजनमर्थाभावेप्यव्याहतं॰ अनृक्साम्नांतु अदृष्टार्थत्वमेवेत्यन्यत्रविस्त
५ रः नत्वेतावता सर्वत्रैवादृष्टार्थत्वं॰ नच मंत्राणां नियमेन पाठे व्यर्थ्यं। तद्बलेन मंत्रैरेवस्मर्त्तव्यमिति नि
5 यमकल्पनात् तस्य चादृष्टफलकत्वेपि न दोषः। नचैवं सामर्थ्यादेव तत्र मंत्राणां विनियोगसिद्धौ तुन
स्तेषां कचिद्विनियोगकरणं व्यर्थमिति वाच्यं। गुणपरिसंख्याद्यर्थत्वेन सार्थकत्वात्॰ तथाहि अर्थप्राप्ते अ
भ्यादाने विकल्पेन चतुर्णां मंत्राणां लिंगेन प्राप्स्यमानानां प्रापकप्रमाणात्पूर्वमेव प्रवृत्तेन तां चतुर्भिराद
त्त इति वचनेन मंत्रसंख्योभयविशिष्टादानभावनायां विहितायां एतद्वचनाभावेपि मंत्राणामादानस
चप्राप्तिसंभवे एतद्वचनप्रवृत्तिफलजिज्ञासायां समुच्चयफलकचतुःसंख्यारूपगुणप्राप्तिरिति
निश्चीयते। तथा लिंगादेवाग्निचयनांगभूताश्वरशनादाने प्राप्स्यमानस्य मंत्रस्य ततः पूर्वप्रवृत्तेनेमा
मगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यनेन वचनेन मंत्रविशिष्टादाने अश्वरशनांगत्वेन ५

विहिते सर्ववत्फलजिज्ञासायां गर्दभरशनातो निवृत्तिरूपशोपि परिसंख्याफलं· नच फलतः परिसंख्या
यां स्वार्थहानिः परार्थकल्पना प्राप्तबाध इति त्रैदोष्यं। अश्वाभिधानीसंबंधरूपस्वार्थस्यैव विधेयत्वात्।
अन्यनिवृत्तिरूपपरार्थस्यार्थसिद्धत्वेनाकल्पनीयत्वात्· प्रापकप्रमाणस्याप्रवृत्त तया प्राप्तबाधाभा
वाच्च· अत एव यत्र प्रापकप्रमाणप्रवृत्त्युत्तरमेव परिसंख्याशास्त्रस्य प्रवृत्तिर्यथा पंच पंचनखा भ
क्ष्या इत्यादौ रागप्राप्तपंचनखभक्षणे पंचातिरिक्तपरिसंख्याकरणे तत्रैव तत्। यत्रापि च श्रौता परिसं
ख्या यथा नानृतं वदेदित्यादौ तत्रापि न तत्। अत एव शब्दतः फलतो वा यस्य शास्त्रस्यान्यनिवृत्तिर्वि
षयः स परिसंख्याविधिः· अत्रैव तद्विध्यभावे प्रायशश्रौत्सर्गिकी तत्र चान्यत्रैव प्राप्तिर्न तु सापि लक्षणघटि च
केति ध्येयं। अत एवैकस्मिन्कार्ये न तस्य सत्वेन सह पाक्षिकप्राप्तावपि नानृतं वदेदिति परिसंख्यैवे
यं। न तु नियमविधिः अत एव यस्य शब्दतः फलतो वा पाक्षिकायोग आवृत्तिरूपो नियमः शास्त्रस्य वि

४१

भा० षयः स नियमविधिः यथा समसमैवदेत् व्रीहीनवहन्तीत्यादौ अत्र नियमस्यैवायोगव्यावृत्त्यर्थकेन एवकारेण वि
६ धेयत्वात् आक्षेपतः पूर्वं प्रवृत्तस्यावघातविधेर्नियमफलकत्वाच्च । नियमे पाक्षिकायोगश्च तन्मात्रविध्यप्र
वृत्तिनिमित्तको विध्यन्तराप्रवृत्तिसहिते तद्विध्यप्रवृत्तिनिमित्तकश्चेत्यादिप्रकारेण बोध्यः । व्रीहीनवहन्तीत्युत्तरे ह
द्विरात्रस्य गत्स्युतं इत्यादावाद्यः । एतद्विध्यभावे आक्षेपेणातिदेशेन चावॉ [ ] तस्याः षोडशिग्रहणस्य च पक्षप्राप्तत्वा घा
त् । व्रीहिभिर्यजेतेत्यादौ द्वितीयः । यवविध्यभावसहिते तद्विध्यभावे व्रीहीणामाक्षेपेण पक्षप्राप्तत्वात् । एवं
विधभेदसत्त्वेपि चायोगव्यावृत्तिमात्रस्य लक्षणे प्रवेशान्न कोपि दोषः । यत्तु दृष्टार्थत्वं नियमविधिल
क्षणं केश्चिदुक्तं तदुत्तरे हि द्विरात्रस्य गत्स्युत इत्यादावव्याप्तत्वादुपेक्षितं षोडशिग्रहयागाभ्यासस्यादृ
ष्टार्थत्वात् । अत एव नियमपरिसंख्यातिरिक्तफलकविधित्वमपूर्वविधित्वमिति तल्लक्षणमपि सु ६
स्थं एतेषां चोपाधीनां क्वचिदुदाहरणे सांकर्येपि न दोष इति न विधिरसायनोक्तलक्षणदूषणावका

शः विस्तरेणचैतदस्मत्कृतेमीमांसाकौस्तुभेद्रष्टव्यं। तदेवंमंत्राणामर्थस्मारकत्वेपिनविनियोगवै
यर्थ्यं। नचैवमपिप्रामाण्यायोगः यथार्थत्वलक्षणस्यतस्याविघातात्। सामादिसर्वमंत्रसाधारण्ये
नतुपदार्थविधया। यथाहिशाब्दबोधंप्रतिकारणीभूतज्ञानविषयत्वाच्छब्दः प्रमाणमितिसर्वदर्श
नमतंतथापदार्थज्ञानस्यापिकारणत्वात्पदार्थोपितथेतिशक्यतेवक्तुं। अतश्चमंत्रविनियोगविधे
र्मंत्राणामपिपदार्थत्वाद्युक्तंप्रामाण्यमिति। प्रामाण्याभावेपिप्रयोजनवत्त्वलाभमात्रेणस्वाध्यायवि
ध्युपपत्तेर्वानकश्चिद्दोषः। प्रयोजनमर्थवादवदेवस्पष्टं॥ ॥इतिभाट्टदीपिकायांखंडदेवकृतौप्रथ
माध्यायस्यद्वितीयःपादः॥ ॥धर्मस्य॥ ॥शिष्टैस्त्रैवर्णिकपरिगृहीतानांमन्वादिप्रणीतस्मृतीनांध
र्माधर्मयोः प्रामाण्यंनवेतिसंदेहेसमूलकत्वनिश्चायकाभावादप्रामाण्यं। नत्वत्रप्रत्यक्षादिमूलंतेषां
धर्माधर्मयोरप्रवृत्तेः वेदस्यचप्रत्यक्षपठितस्यानुपलंभेवास्मृतिप्रणयनवैयर्थ्यात्प्रत्यक्षपठितस्यो

पलंभात् ३१

भा० दानीमुच्छेदस्य च वैदिकैर्यथापरिगणनं शाखानामाम्नायपरित्यागेन पाल्यमानतया कल्पयितुमशक्तेः।
७ न च नित्यानुमेयो वेदो मूलं। स्मृतेर्मूलसामान्यव्याप्तत्वेपि वेदव्याप्तत्वाभावेनानुमानानुपपत्तेः। मनोरप्यनुमे ना
यत्वकल्पने अंधपरंपरापत्तेश्च। अतश्च सन्मूलत्वासंभवाद्भ्रान्त्यादिमूलत्वेनाप्रामाण्यमिति। न प्रान्तेशि
ष्टानामद्ययावदविगीतपरंपरया ज्योतिष्टोमादिष्विवाष्टकाकलिंजभक्षणादिष्वपि धर्मत्वेनाधर्मत्वेन
च परिग्रहान्मन्वादीनां त्रैवर्णिकत्वेन वेददर्शनसंभवाच्च तन्मूलत्वमेव युक्तं न तु भ्रान्त्यादिमूलत्वं। तत्का
रणस्याद्ययावत्तदज्ञानस्य च कल्पने गौरवाच्च। श्रुतिश्च प्रत्यक्षपठितैव मूलं। न च स्मृतिप्रणयनवैयर्थ्यं।
शाखान्तरोपसंहारेणार्थवादापोद्धारेणान्यायसिद्धार्थकथनेन च स्मृतिप्रणयनसार्थक्यात्। अतो मूलश्रु
त्युपस्थापकतयैव धर्माधर्मप्रमाप्रयोजकत्वं स्मृतीनामिति सिद्धं॥ ॥विरोध॥ ॥श्रुतिविरुद्धानाम ७
यि पि औदुंबरीसर्वावेष्टितव्येत्यादिस्मृतीनां श्रुतिमूलकत्वाविशेषात्प्रामाण्यं। न चौदुंबरीस्पर्शे

ञायेदितिप्रत्यक्षश्रुतिविरोधात्तदनुपपत्तिः। परस्परविरुद्धार्थकानामपिग्रहणाग्रहणादिश्रुती
नां वरुशोदर्शने नविरोधे सत्यपि तत्कल्पने बाधकाभावात्। तद्वदेव विकल्पे नविरोधस्यपरिहर्तुं
शक्यत्वाच्च। नत्वत्र प्रत्यक्षश्रुत्यास्मृतेर्मूलाकांक्षानिवर्त्तते। येनकल्पनाम्मूलोच्छेदाद्विरुद्धप्रत्यक्षश्रुत्या
लिंगस्येवस्मृतेर्बाधः स्यात्। नचाशेषशाखायोरिवात्र विषययोरत्यंतविरोधः। येनशाखायाः प्रत्यक्षेणेव
शेषस्यानुमानस्यप्रकृते प्रमेयापहारलक्षणो बाधः स्यात्। नचैतदस्ति विकल्पेनद्वयोः संभवादिति प्राप्ते
भाष्यकारेणैवं सिद्धांतितं। सर्वत्रानुमानेनुमेयजिज्ञासायाः कारणत्वात्प्रत्यक्षश्रुत्याचस्पर्शविधाने
नावेष्टितत्वरूपेणौदुंबर्याः परिच्छिन्नत्वाज्जिज्ञासाभावे नत्वौदुंबरीवेष्टनविषयकश्रुत्यनुमानसंभवः।
तथाप्रत्यक्षश्रुतिविरोधाभावेपि यत्र लोभादिदर्शनं यथावैसर्जनहोमीयंवासोऽध्वर्युः परिगृह्णातीत्या
दौ तत्रापि नश्रुतिकल्पनं लोभहेतोरेवमूलत्वोपपत्तेरिति। वार्त्तिककारस्तु नजिज्ञासायाः अनुमितसंग

पिलो २

भा० त्वं॰ अग्न्याद्यजिज्ञासायामपितदुदयान्। सत्यपिवातस्याःकारणत्वे अनुमितिविषयश्रुतेर्जिज्ञासि
८ तत्वाच्च॰ प्रत्यक्षश्रुतिविरोधाभावे भोदिमूलकत्वांगीकारे अष्टकादिस्मृतेरपितदापत्तेः। अतश्चप्र
४ त्यक्षश्रुतिविरोधेपिस्मृतेःशिष्टत्रैवर्णिकपरिग्रहविशेषेणश्रुतिमूलकल्पनोपपत्तेर्युक्तमेव
प्रामाण्यं। परंतुयावच्छ्रुतिनिश्चयंवेष्टनंनानुष्ठेयं॰ अर्थवादाद्युन्नीतविधिमूलकत्वस्यापिस्मृतिषु
दर्शनेनप्रकृतेपितन्मूलकत्वस्यसंभावितत्वात्तस्यचोन्नयनस्यप्रत्यक्षश्रुतिविरोधेआभास
त्वसंभावनात्॰ अतश्चयावच्छ्रुतिनिश्चयंअननुष्ठानलक्षणमप्रामाण्यमित्यभिप्रायंसूत्रमिति
प्राह। यद्वाशाक्यादीनामपिक्षत्रियत्वप्रसिद्धेर्वेददर्शनसंभवेनतत्प्रणीतस्मृतीनामपिवेदमूल
त्वं। तन्मूलोवेदश्चदानींप्रलीनइति प्राप्ते शिष्टत्रैवर्णिकानांधर्मत्वेनपरिग्रहस्यपूर्वाधिकरण
मुख्यहेतोरभावात्प्रत्युतअप्रमाणत्वेनैवतेषांस्मरणाद्वेदाप्रामाण्यवादिभिरेवचतत्प्रामाण्यस्वीका ८

राद्धेदमूलकत्वकल्पनानुपपत्तेरप्रामाण्यमितिसूत्रार्थः।शिष्टाकोपेस्मार्त्तानामाचमनादीनां
श्रौतैःक्रमकालपरिमाणादिभिर्विरोधेश्रौतत्वात्क्रमादीनामेवप्राबल्यात्तद्विषयस्मृतीनामप्रा
माण्यंनहिक्षुतेआचामेदितिविहितस्यस्मार्त्तस्याचमनस्यवेदवेदिकरणमध्येनुष्ठानेवेदंकृत्वा
वेदिंकरोतीतिश्रुतिबोधितःक्रमोनुष्ठातुंशक्यते।स्मार्त्तपदार्थानांचबहुत्वात्सर्वाह्लादिःकालः
प्रयोगविध्यवगतंचपरिमाणंनशक्यतेनुगृहीतुं।नचश्रौतत्वेपिक्रमादेःपदार्थधर्मत्वात्पदार्थ
भूतेभ्यःआचमनादिभ्योदौर्बल्यंप्रमाणपूर्वकत्वात्प्रमेयावगमस्यप्रथमावगतप्रमाणबलाबलापे
क्षयाप्रमेयबलाबलस्यदौर्बल्यादितिप्राप्तेपदार्थप्राबल्यापेक्षत्वात्क्रमादेरौत्तरकालिकस्यपावत्प्रमाण
गम्यपदार्थाविरोधेनैवकल्पनीयत्वान्नतावत्पदार्थविरोधित्वं।परिमाणंतुनकस्यचिच्छास्त्रस्यार्थइति
नतस्यश्रौतत्वंविरोधेपिआचमनादीनांपदार्थत्वात्प्राबल्यमेवप्रमाणानांहिनस्वरूपतोविरोधोपितु

भा० ९ प्रमेयविरोधनिवंधनः तद्यदेवप्रमेयविरोधआलोच्यते तदेवतत्रतेनवलावलेननिर्णीते शास्त्रार्थेनप्रामाण
वलावलस्यनियामकत्वमितिप्रमाणमेवतत्स्मृतिः। यद्वा यच्छाक्यादिग्रंथेषुवेदाविरुद्धंदानादिवचनंतस्य
१ भवतुप्रमाणतेत्याशंक्यास्वाध्यायोध्येतव्यः वेदोखिलोधर्ममूलंतद्विदांचस्मृतिशीले पुराणन्यायमीमांसा
धर्मशास्त्रांगमिश्रिताः वेदाःस्थानानिविद्यानांधर्मस्यचचतुर्दशेत्यादिवचनेनियतप्रमाणप्रतिपाद्यानामे
वधर्मत्वप्रमितेरन्यतःप्रतीतस्यफलसाधनत्वाभावात्तेषामप्रामाण्यमिति। ।अपिवाकारणाग्रहणे।। ।।अ
निबद्धानांवसंतोत्सवाद्याचाराणांप्रामाण्यंनवेतिसंदेहएतेषांवेदमूलत्वेअष्टकादिवन्मन्वादिभिर्निवंधनापत्तेः
सामान्यतस्तद्विदांचस्मृतिशीलइत्यादिनानिवंधनेपिचविशेषतोनिवंधनेनतेषांकृतिदर्शनाभावनिश्च
यादप्रामाण्यमितिप्राप्तेधर्मवुध्यावैदिकैरनुष्ठीयमानत्वात्स्मृतिवदेववैदिकत्वं।विशेषतोनिवंधनंतुगौ
य रवभियानदोषौ।व्यतिक्रमसाहसदर्शनंतुधर्मवुध्यानुष्ठीयमानत्वान्नवैदिकंनचैतावतासर्वस्याप्य ९

वैदिकत्वं। अत आचाराणामपि धर्माधर्मयोः प्रामाण्यं तैः प्रदर्शनात्ः अत्र प्रयोगरूपस्याचारस्य यत्रा

र्यम्लेछयोः परस्परमर्थविप्रतिपत्तिर्यथा पीलुशब्दस्य वृक्षविशेषे आर्याणां हस्तिन्यन्येषां तत्र तुल्यबलत्वं

। व्यवहारे आर्याणामिव म्लेछाणामप्यभियुक्तत्वाविशेषेण शक्तत्वाविशेषात्। अवध्यस्मरणस्योभयत्रा

पि समानत्वाच्चेति प्रागेश कताबछेदकभेदेनानेकशक्तिकल्पनप्रसंगात् एकत्रैव शक्तिर्नोभयत्र। न च वि

निगमनाविरहः। आर्यप्रसिद्धेरेव नियामकत्वात्ः आर्या हि शब्दैकसमधिगम्यधर्माधर्मयोरविप्लुतिलिप्स

या शब्दार्थतत्वं विविच्य परिपालयंति॰ न म्लेछाः दृष्टार्थव्यवहारस्य यथाकथंचिदपि सिद्धेः। अतस्तत्प्रसिध्या

वृक्षविशेष एव शक्तिः गजप्रतीतिस्तु लक्षणया शक्तिभ्रमाद्वा। यत्र तु नियामकाभावस्तत्राग त्याक्षादि शब्दे

षु उभयत्रापि शक्तिः। आर्याणामेवोभयत्र प्रयोगात्ः। तत्रापि कदाचिद्वाक्यशेषस्य नियामकता यथा

यत्रान्या ओषधयो म्लायंते अथैते मोदमाना इवोत्तिष्ठंतीति सनेनयवशब्दस्य दीर्घशूक एव शक्तिः प्रियं

भा०
१०
10

गुणतुलक्षणादिना। एवंवायत्रमातुलकन्यापरिणयादौस्मृत्याचारयोर्विरोधस्तत्रोभयोरपिश्रुतिकल्पकत्वा
त्तुल्यबलत्वमितिप्राप्तेस्मृतीनांसप्रत्ययप्रणीतत्वात्स्मृतिषुकर्त्तव्यतावाचिविधिप्रत्ययश्रवणाच्चबलीयस्त्वं
आचारेषुतुआचरितॄणांजनानांमन्वाद्यपेक्षयातथाप्रत्ययिततरत्वाभावादितरस्ततोविप्रकीर्णपरम्पकर
णाद्दिगतश्रुत्यनुगमस्याशक्यत्वात्परकीयाचारमात्रदर्शनेनकर्त्तव्यतावाचिविधिप्रत्ययस्याव
श्यकल्पनीयत्वाच्चदौर्बल्यं। अतएवेदानींतनाचारदर्शनेनश्रुतिद्रष्टुःस्मृतिकारस्यस्मृतिंतदुपदेशंवा
कल्पयित्वाश्रुतिकल्पनंस्मृतीनांतुसाक्षादेवेतिविशेषः। अतःस्मृतिविरोधेआचारस्ययावच्छ्रुतिदर्शनं
वाअननुष्ठानं। एवंवा। त्रिवृच्चर्वश्ववालादिशब्देषुयत्रलोकवाक्यशेषयोरर्थविप्रतिपत्तिस्तत्रपदार्थसंबं
न्धेलोकात्वेदस्याधिक्येप्रमाणाभावात्तुल्यबलत्वमितिप्राप्तेविषयैक्याभावेविधिस्तुत्योरेकवाक्यतानुप
पत्तेर्वि धिर्वाक्यशेषस्यैवशक्तिग्राहकत्वमनुमन्यते। अतश्चलौकिकप्रमाणावगतेर्थेनैकशक्तिकल्प १०

तिदर्शनंस्मृ

नाभियानशक्तिरपि तु लक्षणादिनैव बोधः। अत एव यत्र वाक्यशेषो नास्ति तत्रापि त्रिवृद्दादिपदार्थो वैदि
क एव गृहीतव्य इति वक्ष्यते। अतश्च त्रिवृच्छब्दस्य स्तोमगतऋग्नवकं शाकं न तु त्रैगुण्यं च तु शब्दस्योद
नो न तु स्थाली। अश्ववालशब्दस्य काशा नाश्वकेशाः। वाक्यशेषाश्च कौस्तुभे द्रष्टव्याः॥ ॥चोदितं तु॥ ॥
यत्र पिकनेमसततामरसादिशब्दानां नार्याणां अर्थविशेषप्रसिद्धिः। म्लेच्छेषु तु पिकः कोकिलः नेमः अर्द्धं सतं
वृहत्पात्रं दारुमयं शतच्छिद्रं परिमंडलं तामरसं कमलं इत्येवं प्रसिद्धिः। तत्र तत्प्रसिद्धार्थस्यैव ग्रहणं न तु निरु
क्तादिना तत्कल्पना। न च म्लेच्छेषु शब्दार्थयोर्विप्लुतिदर्शनात्तत्प्रसिद्धेरविश्रंभणीयता। पिकादिशब्दानां वे
द एव दृश्यमानत्वेनाविप्लुतत्वात्। अतश्च तेषां वाच्यापेक्षायां तत्प्रसिद्धेरपि क्लृप्ततया शक्तिग्राहक
त्वं। अत एव निगमादिप्रसिद्धेरपि तत्प्रसिद्धित्वेन प्राबल्येप्यक्लृप्तत्वेन दौर्बल्यं। म्लेच्छप्रसिद्धेर्म्लेच्छप्रसि
द्धित्वेन दौर्बल्येपि क्लृप्तत्वेन प्राबल्यं। प्रमाणबलाबलापेक्षया प्रमेयबलाबलवलीयस्त्वस्यस्यापि तत्त्वा

तुः॥ अत एव नात्र विशेषतः पूर्वपक्षः कथितः॥ ॥प्रयोगशास्त्रं॥ ॥सर्वस्मृतीनां कल्पसूत्राणां वा षडंगाना
मेव वा शाक्यादिग्रंथानां वा वेदत्वं वेदतुल्यत्वं वा भवतु श्रुत्यादिमूलकत्वे गौरवात् नित्यब्रह्मयज्ञविधिवि
षयत्वानुपपत्तेश्च॥ अंगानां तु षडंगमेक इति स्मृतेरपि वेदत्वं॥ बुद्धबोधायनमशाक्यादिमिस्तकसमाख्याकत्वा
दिवत्प्रवचननिमित्तत्वेनाप्युपपन्नेति मामेवं तु कर्तृस्मरणात्कठादिवत्प्रवचननिमित्तत्वानुपपत्तेर्नैषां
वेदत्वं वेदतुल्यत्वं वा॥ प्रतिमत्वंतरं चैवं विधानां ग्रंथानां सत्वान्नित्यब्रह्मयज्ञविधिविषयत्वोपपत्तिः॥ ष
डंगमेक इति तु परमतोपन्यास एकपदश्रवणात्॥ तस्मादेषां स्मृत्यधिकरणन्यायेन वेदमूलकत्वमे
वः॥ शाक्यादिग्रंथानां तु तदसंभवात् आभासत्वमेव प्रयोजनं कल्पादीनां वेदत्वे तत्तुल्यत्वे वा पत्रप्रत्यक्षश्रु
तिविरोधस्तत्र विकल्पः यत्र वा प्रत्यक्षश्रुतिविरोधाभावेपि न्यायाभासोपन्यासपूर्वकं वचनं तत्रापि वचनत्वा ११
देव तदनुष्ठानं न्यायोपन्यासस्तु हेत्वधिकरणन्यायेनार्थवादः॥ सिद्धांते तु प्रत्यक्षश्रुतिविरोधे सन्यायविरोधे वया

वन्मूलश्रुतिदर्शनं अननुष्ठानलक्षणमप्रामाण्यं श्रुतिदर्शनोत्तरं तु विकल्पादि। यत्र तु न्यायोपन्यासरहित
मीमांसान्यायविरुद्धं वस्मृतेर्वचनं तत्र श्रुतिमूलत्वसंभवेन वचनविरोधे न्यायस्यैवाभासत्वात्तदर्थ एवानुष्ठे
यमिति। अत्र सर्वत्रोदाहरणानि मूलोक्तोदाहरणदूषणानि वास्मत्कृते कौस्तुभे द्रष्टव्यानि॥ ॥अनुमान॥॥
अथ पत्रस्मृतिषु पाठव्यवस्था यथा गौतमीया छंदोगैरेव तथाचारेषु कर्तृव्यवस्था यथा होलाकादिप्राच्या
यभिमातिभिरेव तत्र तदनुमेयश्रुतिरपि अनुमापकस्य नियतविषयकत्वान्नियताधिकारिकैवेति नान्यै
स्तदनुष्ठेयमिति प्राप्ते यद्यपि अनुमापकं नियतविषयं तथापि नानुमेयश्रुतौ विशेषणं प्राच्यत्वादिदा
तुं शक्यं न हि प्राच्यत्वं नाम सर्वान्वयि अनुगतं जातिव्यक्तिगुणसंस्थानादिभिर्निर्वक्तुं शक्यं तत्तद्देशगतानामप्य
नाचरणात्। चिरविनिर्गतपुत्रपौत्राणामप्याचरणाच्च अतो विशेषणाभावात्सर्वविषयत्वं। गौतमीयादि
स्मृतौ तु नच्छंदोगाधिकारकत्वस्मरणं येन श्रुतावपि तत्संभाव्येत. पाठमात्रं तु तेषां स्मृतिकर्तुः तच्छाखीयत्वा।

भा० दप्युपपन्नं कर्त्ता हि छंदोगाः स्वशिष्यांछंदोगान्स्वर्गं नथानध्यापयामास तेप्यन्यानित्येवं पाठस्तन्मात्रव्यवस्थित इ
१२ तितत्रापि सर्वविषयत्वमेव॥ ॥प्रयोगे॥ ॥स्मृत्यधिकरणन्यायेन सिद्धमपि व्याकरणप्रामाण्यमाक्षिप्यते।
नियमद्वयार्थं हि तत्साधूनेव प्रयुंजीत नासाधूनित्येको गवादय एव साधवो न गाव्यादय इत्यपरः। न च
नियमद्वयस्य मूलं संभवति प्रतिगवादिशब्दमनेकश्रुतिवाक्यपाठासंभवात्। साधुत्वस्य पूर्ववन्निर्व
चनासंभवेनानुगतैकश्रुतिकल्पनानुपपत्तेश्च। न हि साधुत्वं नामार्थप्रत्यापकत्वं अनादित्वे सति वाच
कत्वं वा गाव्यादिष्वपशब्देष्वपि सत्त्वात्। अपशब्दानां क्वचिद्वाचकत्वाभावे गवादिषु गोणत्वस्याप्य
संभवाच्च। अतो वाचकत्वाविशेषान्न व्याकरणेन नियमः संभवति इति प्राप्ते प्रयोगप्रत्यययोः साधुश
ब्दाय भ्रंशजानां गाव्यादिशब्दानां तच्छब्दोपस्थापनद्वारोपपत्तेर्न वाचकत्वकल्पकता अनेकशक्ति १२
कल्पनापत्तेः। इदानीतनानां च शक्तिभ्रमात्तो न च घटकलशादिपदवद्विनिगमनाविरहः पाणिन्या

दिप्रणीतव्याकरणस्यैवनियामकत्वात्. नचनिर्मूलत्वं। प्रयोगनियमेसाधुनैवप्रयुञ्जीतेत्येवंविधा
याएकस्याएवश्रुतेर्मूलत्वात्. साधुत्वंचानादिवाचकत्वं अनपभ्रष्टत्वं वाव्याकरणाभ्यासजनितसं
स्कारव्यंग्याजातिर्वा। प्रमितवृत्त्यार्थप्रतिपादकत्वंवेतिकौस्तुभएववक्षुणंतदभावश्चासाधुत्वं. प्रत्यक्षे
वचश्रुतिर्नम्लेच्छितवैम्लेच्छोहवाएषयदपशब्दइतिमूलं अयंचनिषेधः प्रकरणाज्ज्योतिष्टोमांगं. यज्ञ
मात्रेपिचनिषेधोयाज्ञेकर्मणिनियमोन्यत्रानियमइतिमहाभाष्याद्यनुसारात्. साधुप्रयोगनियमात्स्व
र्गफलोदयइति अपिएकशब्दः सम्यक्ज्ञातः सुप्रयुक्तः स्वर्गेलोकेकामधुग्भवतीतिवचनात्. अत्रहि
प्रयोगाश्रितः साधुनियमः फलोद्देशेनविधीयते। एवंप्राप्तस्यापिवसाधुप्रयोगस्यतस्मादेषाव्याकृतावा
गुद्यतइतिवचनादाश्रयत्वसिद्धिरितिस्पष्टंकौस्तुभे। गवादयएवसाधवोनगाव्यादयइतिसाधुस्वरूपनिय
मस्यतु अनादिप्रयोगपरंपरैवमूलं. अतः प्रमाणंव्याकरणं। यत्तुन्यायमूलकंस्फोटादितन्नोच्यतेश्रुतिवि

रुद्धं च तन्न्यायश्रुतिविरोधे कामं भवत्वप्रमाणं॥ ॥प्रयोगवोदना॥ ॥वाचकशब्दप्रसंगाद्वाच्यं किं घटत्वा
दिर्जातिः उत व्यक्तिरिति चिंता॥ तदर्थं च लोकवेदयोशब्दानामन्यत्वमुतनेति चिंतनीयं॰ अन्यत्वे हि
उपायाभावेन वैदिकशब्दशक्तिग्रहस्यासंभवान्नाद्याविंतारंभरणायाएकत्वेतु लोके वृद्धव्यवहा
13 रानुसारेणागृहीताशक्तिर्वेदे फलिष्यतीति पुक्ताचिंता॰ तन्न वर्णाभेदेपि स्वरछांदसवर्णागमलोप
विकारानध्यायादिधर्मभेदात्सरोरस इत्यादिपदयोरिव लोकवेदयोःपदानामन्यत्वमिति प्राप्ते यत्रार्थ
भेदप्रतीयन्यनुक्तलोधर्मभेदस्तत्रैव पदभेदो यथा सरोरस इतिक्रमात्तः व्रलब्राह्मणेतिन्स्नातिरिक्त
त्वात् स्थूलपृषतीत्यत्र कर्मधारयवहुव्रीह्योःस्वरात् अंतोदात्तत्वाद्युदात्तत्वरूपात् पचतेदक्षि
णां देहि।भोजनार्थं पचत इत्यत्र व्यधिकरणपदसंन्निधिरूपाद्वाकात्।यातः पुनरायाति यातो दे
वदत्त यज्ञदत्तौ इत्यत्र समानाधिकरणपदसन्निधिरूपश्रुत्या॥ अश्व इति अग छदित्यर्थे व्याकरणस्म १३

त्यात् दभिन्नस्य पदभेदाननुभवात्ः यत्र तु नार्थभेदप्रतीतिस्तत्र सत्यपि धर्मभेदे दृष्टतरमत्यभिन्ना
वत्वेनैकत्वावधारणान्न पदान्यत्वं लोकवेदयोरिति युक्ता आद्या चिंता। तत्राचद्यातादिक्रियाणां
लिंगकारकसंख्यादीनां च जातावयोग्यत्वात् गोः शुक्ल इत्यादिसामानाधिकरण्यनिर्देशाच्च व्यक्तिवा
चित्वमेव न चैवं जातिबोधानापत्तिः। लक्षणादिना तद्बोधोपपत्तेः। व्यक्तिशक्तिग्रहस्यैव वाकार्यतावच्छे
दकं जातिविशिष्टशाब्दबोधत्वं अतो न दोषः। न च विनिगमनाविरहः। लाघवस्यैव नियामकत्वात्ः
तथाहि· न शक्तिग्रहस्य स्वातंत्र्येण कारणत्वं· अपि तु लाघवाछक्यत्वादिसंबंधेन घटपदवत्ताज्ञान
स्यैव· अतश्चास्मन्मते घटत्वं धर्मितावच्छेदकीकृत्य शक्यत्वसंबंधेन घटपदवत्ताज्ञानस्य घटो घटप
दवानित्याकारकस्य विशेष्यतासंबंधेन विशिष्टशाब्दबोधत्वावच्छिन्नं प्रति कारणत्वं· भवन्मते तु घटत्वं
धर्मितावच्छेदकीकृत्य तद्वाच्यं अतश्च घटत्वस्य घटेतरावृत्तित्वादिरूपस्यानेकपदार्थघटितस्य प्रवेशात्तव

कार्यकारणभावेगौरवंनमम॰नचशक्त्यानंत्यादिदोषः।तस्यफलमुखत्वात्॰अतश्चलाघवात्व्यक्तावेव
शक्तिर्जातिविशिष्टव्यक्तौवानतुजातावेवेतिमतेघटत्वंधर्मितावच्छेदकीकृत्यशक्तत्वसंबंधेनघटपद
वत्तानिश्चयस्यकारणत्वंपदत्वंधर्मितावच्छेदकीकृत्यशक्तत्वसंबंधेनघटवत्तानिश्चयस्यवाघटपदं
घटवदित्याकारस्यकारणत्वमित्यत्रविनिगमनाविरहेणानंतकार्यकारणभावप्रसंगात्॰अस्मन्मते
घटपदत्वंधर्मितावच्छेदकीकृत्यशक्तत्वसंबंधेनघटत्ववत्तानिश्चयस्यैवघटपदंघटत्ववदित्याकारक
स्यकारणत्वकल्पनाल्लाघवं॰नचममापिविपरीतमापादयितुंशक्यंतथासतिघटत्वस्यधर्मित्वेनस्वरूपेण
तस्यधर्मितावच्छेदकत्वेनघटत्वत्वप्रवेशेगौरवस्यत्वयैवोक्तत्वात्।तोअतोनघटत्वत्वावच्छिन्नंघटत्वंशक्तत्व
संबंधेनघटपदवदित्याकारकंज्ञानंकारणंअपितुघटपदंशक्तत्वसंबंधेनघटत्ववदित्याकारकमेव॰
जातेःस्वरूपेणैवप्रकारत्वोपपत्तौघटत्वत्वस्याप्रवेशात्॰अतश्चकार्यकारणभावेपिलाघवात्घटत्वएवश

क्तिः। शक्तमानं त्यादि च नास्मन्मते। अतः प्रथमोपस्थितजातावेव शक्तिः एवमरुणादिशब्दादावपि गुण एव
गुणत्वेवानतु तद्विशिष्टद्रव्ये कथं तर्हि व्यक्तिवोधः। अभेदात्। उक्तविधकारणस्य जातिगुणविशिष्टव्यक्तिशा
ब्दत्व एव कार्यतावच्छेदकत्वस्वीकाराद्वोपपत्तेः। वस्तुतस्तु जातिगुणशाब्दत्वमेव लाघवेन कार्यतावच्छे
दकं। व्यक्तिस्तु तत्ततीयादिस्थले पशुनायजेत अरुणयाक्रिणातीत्यादौ नैव पदाज्ज्ञासते जातिगु
णयोरिव द्रव्यपरिच्छेदद्वाराकरणत्वोपपत्तेः लिंगसंख्ययोरपि पाशाधिकरणन्यायेन सामानाधि
करण्येन पार्ष्ठिको जातिगुणसंबंधः। अतः संबंधविधयैव तत्र द्रव्यबोधः। [illegible]तीयांतादिस्थले तु जातिगु
णयोः कर्मत्वाद्यन्वयासंभवाद्व्यक्तेर्लक्षणया बोधः तस्या एव च कर्मत्वाद्यन्वयः। लिंगसंख्याद्यन्वयश्च
साक्षात्संबंधेनैव सामानाधिकरण्यं च व्यक्तिद्वारकमिति सर्वं सुस्थं। प्रयोजनं द्रव्यपक्षे रथंतरा
दिशब्दानां ऋक्षु वाचित्वाद्रथंतरमुत्तरयोर्गापतीत्यादौ उत्तरापदलक्षितो त्तराकार्ययोर्निविधानं सि

ह्यंतेतुगीत्यतिदेशाउत्तरास्वितिवक्ष्यते॥ ॥इतिश्रीखंडदेवविरचितायांभाट्टदीपिकायांप्रथमस्यतृतीयः
पादः॥ ॥उक्तंइहगुणविधित्वेननामधेयत्वेनवासंमतानांसर्वेषामेवफलपदातिरिक्तसुबंतानांउद्भित्सो
मादिपदानांप्रामाण्यमप्रामाण्यंवेतिसंशयेप्रकारासंभवादप्रामाण्यं।तथाहि।उद्भिदायजेतपशुकामः
सोमेनयजेतेत्सादावुद्भिदादिपदेभ्यःस्फतिबुद्धेरनुत्पत्तेर्नतावदर्थवादत्वं।मंत्रत्वप्रसिध्यभावाच्च
नतत्·एतेषांप्रयोगकालोच्चारणेचैतत्प्रतिपाद्यार्थस्ययागांगतावोधकप्रमाणाभावेनैतेषांप्रयो
गसमवेतार्थस्मारकत्वानुपपत्तेश्च·नचविध्यंतर्भावः।कामशब्दाद्यभावेनसाध्यानभिधायकत्वा
त्·एकपदगतयजिनैवकरणप्रतिपादनेएतेषांतत्प्रतिपादकत्वायोगात्·सिद्धरूपाणांसोमादी
नांव्यापारांतरमंतरेणभावेनेतिकर्त्तव्यतात्वानुपपत्तेश्च·नामधेयत्वेतुभ्यभिन्नत्वादेवकरणानुग्राह
कत्वादिरूपेतिकर्त्तव्यतात्वानुपपत्तिः·नचकथमपिभावानान्वयासंभवेपियागएवकरणत्वेनान्वयोभ १५

वद्भवेति वाच्यं॰ कारकाणांपरस्परसंवंधाभावात्॰ अतः कथमपि क्रियान्वयासंभवादनाख्यातत्वेन विधिभा
वनयोरनभिधानात् अन्यस्य च प्रकारस्य निर्वक्तुमशक्यत्वादप्रामाण्यमिति प्राप्ते अध्ययनविध्यधा
पितस्य अप्रामाण्यासंभवात्प्रकारांतरासंभवेपि विध्यंतर्भावस्यस्पष्टत्वेन नत्रैव गुणविधित्वेन नामे
धेयत्वेन वा वक्ष्यमाणनीत्या सर्वानुपपत्तिपरिहारेण प्रामाण्यमिति सिद्धं॥ ॥अपि वा नामधेयं॥ ॥
अतः परं क्व गुणविधित्वं क्व वा नामधेयत्वमिति कोष्टशोधनिकार्थमारंभः। नहि गुणे कर्मणि च तुल्य
वद्वृत्तिकानामुद्भिदादिपदानां विधेयगुणसमर्पकत्वं कर्मनामधेयत्वं वेति चिंतायामिद विदारणत्वा
तिस्मृत सा विदारणसमर्थखनित्रादिवचनत्वप्रसिद्धेर्नामधेयत्वे वैयर्थ्यप्रसंगाच्च गुणविधित्वमेव सु
क्तं। तत्र च गुणविशिष्टं कर्मेव फलोद्देशेन विधीयत इत्येकः पक्षः। अथवा प्रकृतसोमयागानुवादेन गुण
मात्र विधानमित्यपरः। न च विनिगमनाविरहः। इति कर्त्तव्यतासंनिधिविशेषस्यैव कर्मविधिनियामक

भा० त्वात्॰ नचैवंफलपदानर्थक्यं॰ सर्वेभ्योज्योतिष्टोमइतिवचनेनतस्यसर्वफलार्थत्वावगतेर्यजिपदस्य
१६ पशुफलोपधायकयागलक्षणार्थत्वात्॰ अतएवनविशिष्टोद्देशेवाक्यभेदोनवोत्पत्तिशिष्टसो
16 मप्राबल्यं॰ पशुकामप्रयोगविशेषपुरस्कारेणविहितस्यखनित्रादेःसामान्यविहितसोमादिबाधकत्वात्॰
वस्तुतस्तुप्रकृतसोमयागाश्रितःखनित्रादिगुणएवफलोद्देशेनविधीयतेइतितृतीयःपक्षः।काम्यत्वादे
वचनित्यसोमबाधइतिप्राप्तेब्रूमः। नायंगुणविधिर्गौरवात्॰ तथाहि॰ सर्वत्रैवतावच्छुद्धधात्वर्थकरणक
भावनाविधानादाद्योविधिप्रकारः यथाग्निहोत्रंजुहोतीति। अन्योद्देशेनतद्विधिरपरः। यथाग्निहोत्रंजु
हुयात्स्वर्गकामइतिएतस्यचोद्देश्यवाचकपदांतरसापेक्षत्वाद्दौर्बल्यं। धात्वर्थोद्देशेनान्यकरणकभा
वनाविधिस्तृतीयः। यथादध्नाजुहोतीति। अत्रविधेयतायाधात्वर्थवृत्तित्वाभावात्पदांतरार्थवृत्तित्वाच्च १६
ततोपिदौर्बल्यं। धातोःसाधुत्वार्थत्वमंगीकृत्यअन्योद्देशेनान्यकरणकभावनाविधिश्चतुर्थः। य

थाद ध्येंद्रियकामस्य जुहुयादिति· अत्र धात्वर्थस्योद्देश्यत्वेनाप्यसंबंधान्नतोपि दौर्वल्यं। गुणविशिष्ट
धात्वर्थकरणकभावना विधानं पंचमः यथा सोमेन यजेतेति। अत्र विशेषणविधिकल्पनादेराधिक्या
त्ततोपि दौर्वल्यं· अन्योद्देशेन प्रवृत्तः षष्ठः यथा सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम इति अयं तु सर्व
दुर्वलः तदेवं तु द्विगुणविशिष्टस्य यागस्य फलोद्देशेन विधाने षष्टविधिप्रकाराश्रयणादति गौरवं
गुणस्य यागे अन्वयान्मत्वर्थलक्षणाच· नहि भावनायां समानपदोपात्त धात्वर्थकरणत्वावरुद्धायां
गुणस्य करणत्वं संभवति· अतस्तस्य यागान्वयावश्यकत्वे यागस्य कारकत्वात्कारकाणां च परस्परं
संबंधानुपपत्तेः सोमेन यजेतेतिवदुद्भिद्वता यागेनेति मत्वर्थलक्षणावश्यकीति प्रांचः। वस्तुतस्तु
दृष्टांतेपि सोमस्य करणत्वेनैव भावनायामेवान्वयस्तत्र तत्र वक्ष्यते युक्तश्चैक एककरणावरुद्धेपि करणां
तरस्याभिन्ननिरूपितस्य प्रकारतया भावनान्वयोपपत्तेः नहि यागकरणत्वं भावनानिरूपितं· अपि

भा० तुस्वर्गनिरूपितं। अतश्च यथैवान्यनिरूपितमपि तत्करणत्वं प्रकारतया भावनायामन्वेति तथैव सोम
१७ करणत्वमपि यागनिरूपितं उभयतत्तन्निरूपकस्य पार्ष्टिकबोधलभ्यत्वाच्च न कोपि विरोध इति नास्मि
17 न्नपि पक्षे यद्यपि मत्वर्थलक्षणा तथापि विशेषणविधिकल्पनादिकृतं गुणयागोभयविशिष्टभावनावि
धेर्गौरवमापद्यमानं नापह्नोतुं शक्यं। यथा च प्राथमिकभावनासंबंधांगीकारेपि द्वितीयबोधवेलायाम
त्वर्थकल्पनात् तथोक्तं कौस्तुभे एवं द्वितीयतृतीयपक्षयोरपि जघन्यविधिप्रकारांगीकरणं दोषा
पाच्च अगत्या च दधिसोमादावेतदंगीकृतं तेषां तत्र अत्यंतरूढत्वेन नामत्वासंभवात्. प्रकृते तु येनैव
योगेन खनित्रे प्रवृत्तिस्तेनैव योगेनोद्भिद्यते उत्पाद्यते फलमिति व्युत्पत्त्या कर्मण्यपीति नामत्वसंभ
वेन द्वितीयविधिप्रकारांगीकरणान्नाद्यवं. न च भिदेर्विदारण एव स्मृतेः शक्तिः। भिदिर् इत्येव धातुपा १७
रात् विदारणाद्यस्य शब्दार्थमात्रोपलक्षणत्वस्य वैयाकरणसिद्धत्वात्। अतो विदारणादिवोत्सादनेपि

प्रयोगात्तुल्यवद्वृत्तिकत्वान्न च नामधेयानर्थक्यं। संकल्पादौ सार्थकत्वात्. कश्चित्फलोपवंधस्वय
थाद् दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति कश्चिद्गुणोपवंधः यथा संस्थाप्य पौर्णमासीं वैमृधम
नु निर्वपतीति। प्रकृते च संज्ञया भेदासिद्धिरेव प्रयोजनं।इतरथा हि प्रकृत एव कर्मणि गुणफलो
पवंधापत्तेर्न कर्मांतरत्वं. न च योगस्य फलोऽद्भेदनकारित्वस्यातिप्रसक्तत्वाद्दर्शकर्मणि रूढिक
ल्पने सोमादिपदानामपि तदापत्तिः। सर्वत्र योगरूढिस्थले प्राचीनप्रयोगस्यैव कारणतायाः कृप्तत्वेन
प्रकृते तदकल्पनात्. प्रयोजनं स्पष्टं। यस्मिन्। अत्र गुण एव रूपाणां चित्रया यजेत पशुकामः पंचदशा
न्याज्यानि सप्तदशानि पृष्ठानि त्रिवृद्बहिः ष्पवमानमित्यादौ चित्राज्यपृष्ठबहिष्पवमानशब्दानां गुणविधि
त्वं कर्मनामत्वं वेति चिंतायां दध्यादिवद्रूपेषु कर्मनामत्वासंभवाद्गुणविधित्वमेवैषां तत्र चित्रापदे ता
वत्स्त्रीति पदिकेन चित्रत्वं स्त्रीप्रत्ययेन च स्त्रीत्वं विधीयते विधेययोश्च परस्परसाहित्यावगतेर्विधेयसाम

भा० र्थ्यानुरोधेनप्राणिद्रव्यकयागस्योद्देश्यत्वावगतेः प्रकृतानामपिदधिमधुघृतंपयोधानाउदकंतंडुला
१८ स्तत्संसृष्टंप्राजापत्यमित्येतद्वाक्यविहितानांयागानामुद्देश्यत्वासंभवेपिसर्वप्रकृतिभूताग्नीषोमीयया
18 गोद्देशेनसर्वपशुयागोद्देशेनवाविधीयते॰ नचानेकगुणविधानेवाक्यभेदः। धेनुर्दक्षिणेतिवदुभयविशि
ष्टैककारकविधानेनावाक्यभेदात्॰ एवमाज्यपदेनघृतंदृष्टपदेनशरीरावयवः। सचसंख्याविशिष्टः
प्रकरणादाज्यैःस्तुवतेपृष्ठैःस्तुवतइत्येतद्वाक्यविहितस्तोत्रांगतयायथाक्रमंविधीयते॰ एवंत्रिवृ
छब्दवाच्यत्रिभिंडीद्रव्यंपवनक्रियाविशिष्टंतथैवतद्वाक्येनविधीयतेसर्वत्रद्रव्याणांस्तोत्रसमीप
देशेऽदृष्टार्थस्यापनेनैवस्तोत्रोपकारकता। उत्पत्तिवाक्येषुआज्यादिपदंगुणवाक्यप्राबल्यादनुवादः
स्तोत्रमात्रंतुविधीयतइतिप्राप्तेप्राप्तकर्मानुवादेनविचित्रत्वस्त्रीत्वरूपानेकगुणविधानेवाक्यभेदात्प्रकर
णत्वस्यापिपशुगतस्यप्राप्तत्वेर्नविधेयतयोभयविशिष्टकारकविध्ययोगादग्नीषोमीयइतिवचनेनविहित १८

प्राकरणिकपुंस्त्वावरोधेस्त्रीत्वस्यविध्ययोगाच्चनगुणविधिः।अतःप्रकृतानामेवयागानांविचित्रद्रव्य
कत्वेनलक्षणाच्चित्रापदंनामधेयं।इष्टाभिप्रायेणवस्त्रीप्रत्ययः।एवमाज्यादिपदेष्वपिअसमस्तत्वेनविशि
ष्टस्याप्युत्पन्नत्वात्[illegible]प्रस्तोत्रानुवादेनद्रव्यसंख्याद्यनेकगुणविधौवाक्यभेदः।तदोत्पत्तिवाक्यएवद्र
व्यविशिष्टस्तोत्रविधिरितरत्रतुसंख्यामात्रविधिरस्तीतिवाच्यं।घृतादीनांस्तोत्रेकरणत्वासंभवेनवि
शिष्टविध्ययोगात्।पंचदशानीत्यादिस्तुतिगतत्रिकसंख्यारूपस्तोमवाचिडुप्रत्ययस्यगुणविधित्वे
नुपपत्तेश्च।अतआज्यादिपदंवाक्यद्वयेपिशक्तैवस्तोत्रनामधेयं।आज्यादिपदाभिधेयस्तोत्रानुवादेनगु
णवाक्येसर्वत्रसंख्यामात्रविधिः।आज्योत्पत्तिवाक्येचतत्संज्ञकानिचत्वारिस्तोत्राणिगमकसहकृतब
हुवचनेनतावत्त्वावगमात्।एवंपृष्ठोत्पत्तिवाक्येपिषट्।अनुष्ठेयानिनियतानिचत्वारिआद्ययोर्द्वयो
र्बृहद्रथंतरयोरंत्ययोश्चनौधसश्यैतयोर्वचनेनविकल्पविधानात्।यथाचात्रतत्तद्दूषणानांनिरासो

भा०
१९ मंत्रांतरदूषणानिचतानिकौस्तुभेद्रष्टव्यानि।तत्प्रख्यं।इहरूढानांयौगिकानांवासंभवत्प्राप्तिका
नामग्निहोत्रंजुहोति·आधारमाघारयतिसमिधोयजतिइत्यादौअग्निहोत्रादिपदानांगुणविधित्वं
19 कर्मनामत्वंवेतिचिंतायांप्रसिद्धेर्गुणविधित्वमेवयुक्तं·नचवाक्यभेदः विधेयानेकत्वाभावात्·अतो
ग्निहोत्रपदेअग्नयेहोत्रमस्मिन्नितिव्युत्पत्त्याउपसर्जनार्थोग्निर्देवताहोमेविधीयते।नचपदग्नयेचप्र
जापतयेचसायंजुहोतिइत्यनेनतस्याःप्राप्तत्वादविधानं·तत्रानेकगुणोपादानेनविशिष्टकर्मांतरवि
धेरावश्यकतयाएतद्वाक्यविहितेकर्मणितत्प्राप्तेरभावात्·अतोयत्रदर्विहोमादावाग्नेयोमंत्रःपठि
तः।तादृशादर्विहोमानुवादेनदेवतामात्रमनेनविधीयतेवचनेनतत्प्राप्तिसंभवेमांत्रवर्णिकविधे
रकल्पनीयत्वात्·विशिष्टकर्मांतरंवा·आधारवाक्येपिद्वितीयांताघारपदेनक्षरणासमर्थमाज्यादिद्र १९
वद्रव्यमभिधीयते·धातुनाचक्षरणाख्यःसंस्कारस्तदुद्देशेनविधीयते·अविनियुक्तस्यचसंस्कारा

योगात्प्रकरणकल्पितवाक्येनोपांशुयाजांगत्वाद्वद्द्रव्यंविधीयतेचतुर्गृहीतंवाएतदभूत्तस्याधारमा
धार्येत्यनेनवाप्रयाजांगभूतचतुर्गृहीतरूपविशेषसमर्पणंसर्वथाधारयदंद्रव्यपरंननामधेयमिति
प्राप्तेमंत्रवर्णकल्प्यविधिनैवप्राप्तिसंभवेऽस्यपूर्वप्रवृत्त्याविधिवैफल्यापत्तेरभ्युदयशिरस्कत्वस्यच
संभवतिप्रथमविध्यापादकधात्वर्थविधावन्याप्यचत्वान्नतावद्दर्विहोमानुवादेतदेवताविधिःनापि
विशिष्टकर्मांतरविधिःअग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिसायंजुहोतीतिवचनविनियुक्तमंत्रवर्णेनैवदेवता
प्राप्तेःपदग्नयेचप्राजापतयेचसायंजुहोतियत्सूर्यायचप्रजापतयेचप्रातरित्यत्रलाघवात्सायंप्रातः
कालीनदेवतासमुच्चयविशिष्टप्रजापतिमात्रविधानं॰अतएवयथैवकेवलदेवत्यमंत्रलिंगवशेनकेवलयो
र्देवतात्वं॰तथाग्निर्ज्योतिर्ज्योतिःसूर्यःस्वाहेतिसायंजुहोतिसूर्योज्योतिर्ज्योतिरग्निःस्वाहेतिप्रातरितिमिश्रलिं
गकमंत्रवर्णान्मिश्रयोरर्पितत्वं॰अतश्चपदग्नयेचेतिवाक्यस्याग्निसूर्यपदंसायंप्रातःकालीनदेवतालक्षकंसा

भा० २० यंम्नातःपदंतात्पर्येणाहकां।चशब्दोपस्थितसमुच्चयस्यवप्रजापतावत्वयस्यनिपातोपसर्गार्थत्वेनव्युत्प
न्नत्वान्नविधेयानेकतास्मतश्चाग्नेर्देवतात्वादिनाग्निहोत्रहोमेप्राप्तत्वादग्निहोत्रपदंअग्नेर्होमइत्ये
वंव्युत्पत्त्यानामधेयं॰एवमाघारेपिउपांशुयाजेसर्वस्मैवाएतद्यज्ञायगृह्यतेयद्ध्रुवायामाज्यमित्य
नेनैवद्रव्यस्यप्राप्तत्वात्प्रयाजाज्योद्देशेनसंस्कारविधानेपिचद्वितीयविधिप्रकाराप्राप्तेर्लाघवाद्भा
वव्युत्पन्नमाघारपदंनामधेयंविधेयंचधातुलक्ष्योहोमएवाइंद्रऊर्ध्वोध्वरइत्याघारमाघारयतीतिमांत्र
वर्णिकेइंद्रदेवतायाश्चतुर्गृहीतेवत्पनेनचद्रव्यस्यलाभात्॰एवंसमिदादिष्वपिवक्ष्यते।सर्वत्रद्वितीयाक
रणत्वलक्षणार्थेतिनविरोधः॥ ॥तद्व्यपदेशंच॥ ॥श्येनेनाभिचरन्यजेतेत्यादौपूर्वोक्तबाधकाभावात्प्र
सिद्धेःश्येनादिपदानांगुणविधित्वमेवप्रकृतसोमयोगाश्रितोगुणःफलोद्देशेनविधीयते।विशिष्टक २०
र्मांतरंवानचैवंपथाविश्येनोनियत्यादत्तएवमयंम्नातव्यंनियत्यादतइत्यर्थवादेस्वस्यैवस्वोपमानानुप

पत्तिः उपक्रमनिर्णीतविध्यनुरोधेनोपसंहारस्यार्थवादस्यान्यथानेयत्वात् । तेनद्विलासाइवतद्वि
लासाइत्यादिवदनन्वयालंकारस्यास्याभेदेऽप्यनुगुणत्वाच्चेति प्राप्तेनायमनन्वयालंकारस्तथात्वे सर्वेषामर्थ
वादपदानामुपमानांतराभावलक्षकत्वापत्तेः तद्वरं भूयोनुग्रहस्य न्याय्यत्वात् उपक्रमस्थएवैकस्मि
न्पदेरूपकविधयालुप्तोपमाविधया वा गौणीवृत्तिमंगीकृत्य नामधेयत्वं द्वितीयविधिप्रकारापादकं
युक्तमाश्रयितुं । अर्थवादस्तु रूपकाद्यपेक्षितसादृश्योपपादनार्थः सर्वविनैव लक्षणां पूर्णोपमालं
कारविधया विधेययागस्तुत्यर्थो न विरुध्यते तत्सिद्धं चतुर्भिरेवप्रकारैः सर्वत्र नामत्वमिति ॥ ॥ना
मधेयं ॥ ॥एवं यत्र यत्र विशिष्टविधिपूर्वपक्षे पानिकषणा निमत्वर्थलक्षणादानि दत्तानि तानि रहस्या
क्षिप्तं ते । यदि हि यागस्य कारकत्वं स्यात्ततः सोमादीनां कारकांतराणां तदन्वयानुपपत्तेर्भवेन्मत्वर्थलक्ष
णा उभयविशिष्टभावनाविधानं वा । न त्वेतदस्ति । यागस्य क्रियारूपत्वांगीकारात् । अत एव तस्मिन्

भा०
२१ सर्वकारकाणांभावनावदेवविनैवमत्वर्थलक्षणांविनैववैरूप्यंसंबंधोपपत्तिःयागस्यचक्रियात्वेपिसं
बंधसामान्येनभावनान्वयोनविरुध्यते।भावनावावैय्याकरणवदतिरिक्तानैवांगीक्रियते।अतश्चोद्भि
दादिष्वपिसर्वत्रगुणविधित्वमेवावाजपेयोदाहरणंतुमल्लेगुणसूत्रानुरोधेनेतिप्राप्तेपचतीत्यस्यपाकं
करोतिपाकेनकरोतीतिविवरणात्धात्वर्थस्यकर्मत्वकरणत्वान्यतरकारकत्वेनैवभावनान्वयःभावनाव
यथानिरिक्तातथावक्ष्यते।अतश्चेतरकारकाणांधात्वर्थान्वयानुपपत्तेरगन्योभयविशिष्टभावनाविधा
नंसोमादावंगीकृतंप्राचीनरीत्यावामत्वर्थलक्षणा।अन्यथाश्रुत्यैवफलगुणयोर्यागान्वयेफलान्व
यार्थंयागस्योपादेयत्वविधेयत्वगुणत्वानिगुणान्वयेचोद्देश्यत्वानुवाद्यत्वप्राधान्यानीतिविरु
द्धत्रिकद्वयापत्तेः।उपादेयत्वादिनिरुक्त्यादिकंचकौस्तुभेद्रष्टव्यं।अतोमत्वर्थलक्षणादिभिया
विशिष्टविध्यनुपपत्तेर्नामधेयत्वमेवोद्भिदादीनां॥ ॥तद्गुणास्तु॥ ॥आग्नेयोष्टाकपालो २१

मावास्यायांपौर्णमास्यांवाच्युतोभवतीत्यादौआग्नेयशब्दोगुणविधिःकर्मनामधेयमितिचिंतायां
अग्नेर्मंत्रवर्णाद्देवप्राप्तत्वादाग्नेयपदंनामधेयं इति प्राप्ते पुरोडाशकर्मकायाभावनायामंत्रापेक्षा
भावान्मंत्रस्यचतत्रायोग्यत्वान्नोपांशुयाजइवमंत्रस्यदेवताकल्पकत्वंनवाधारवद्वाचनिकोवि
नियोगोमंत्रस्ययेनतत्कल्पकत्वंसंभाव्येतनचमंत्रस्याष्टाकपालकर्मकभावनांगत्वेप्रमाणम
स्ति।प्रकरणस्यउपांशुयाजादिवविशिष्टत्वात्ःनापिक्रमात्ब्राह्मणपाठक्रमापेक्षयामंत्रपाठ
क्रमवैपरीत्यस्यपंचमेवक्ष्यमाणत्वात्ःअतस्तत्प्रख्यन्यायाभावान्नामत्वानुपपत्तेर्द्रव्यदेवतोभ
यविशिष्टभावनाविधिप्रतीतेस्तस्यचयागमंतरेणानुपपत्तेर्भूधातुनातल्लक्षणात्सकलविशे
षणविशिष्टयागभावनाविधानेनअर्थाद्विशेषणानामपिविधिकल्पनात्गुणविधिरेवाग्ने
यशब्दःप्रयोजनंआग्नेयंपयइत्यादौनामातिदेशेनाग्नेयविध्यंतःपूर्वपक्षेसिद्धांतेसान्नाय्यवि

भा० ध्यंतः बर्हिराज्ययोः। बर्हिराज्यपुरोडाशादिशब्दानां संस्कृतेषु कुशादिषु शास्त्रस्थैः प्रयुज्यमानत्वाद्यूपादि
२२ शब्दवत्संस्कारमात्रवाचित्वे संस्कारविशिष्टकुशादिवाचित्वे वा प्राप्ते जातिं विहाय कैरप्यप्रयुज्यमानत्वा
22 त्संस्कारं विनापि च लोके बर्हिरादाय गावो गताः आज्यं क्रय्यं पुरोडाशेन मे माता प्रहेलकं ददातीत्यादौ
प्रयुज्यमानत्वादव्यभिचाराल्लाघवाच्च कुशत्वादिजातिवाचित्वमेव प्रयोजनं इष्या वदस्तरणार्थं बर्हि
रादौ पूर्वपक्षे संस्कारकरणं। सिद्धांते नेति। प्रोक्षणीषु प्रोक्षणीशब्दस्यापि पूर्ववत्संस्कारवाचि
त्वे प्रोक्षणीभिरुद्वेजितास्म इति लोके संस्कारं विहाय जातिमात्रे प्रयोगदर्शनात् रूपाजलत्वजा
तिवाचित्वे वा प्राप्ते रूढ्यभावप्रयोगे नोपपत्तौ रूढिकल्पने प्रमाणाभावः। अत एवाश्वकर्णादि
शब्दे योगबाध एव तत्कल्पनं न चायामोदासीन्यावस्थायां प्रकृष्टोक्षणसाधनत्वरूपयोगाभावः २२
फलोपधानसंभवेपि उक्षणस्वरूपयोग्यत्वस्य संभवात् न चैवं रथकारपदेपि रथकर्तृत्वयोग्य

त्वं रूपयोगसंभवेन जातिविशेषे शक्तिकल्पनानुपपत्तिः। अनुशासनबलेन न तत्कल्पनात् कर्तृ
त्वस्वरूपयोग्यत्वस्याव्यावर्त्तकत्वेन वर्षासु रथकादस्येत्यस्य वैयर्थ्यापत्तेश्च प्रोक्षणीशब्देनुरूढि
कल्पने प्रामा•णाभावाद्यौगिकत्वमेव प्रयोजनं विकृतौ घृतं प्रोक्षणमित्यादौ प्रोक्षणीरासादयेत्य
विकृतः प्रयोगः संस्कारवाचित्व पक्षे घृतमासादयेति तातिवाचित्वे प्रोक्षणमासादयेति यौगिकत्वे
द्रष्टव्यं। तथा निमर्थ्येष्विमंथ्येतेष्टकाः पचंतीत्यत्र निर्मथ्यशब्दस्य पूर्ववत्संस्कारवाचित्वे निर्मथ्यमा
नपपक्षाम इति लौकिकप्रयोगेन निरस्ते मथनकर्मत्वस्य पाकसाधनीभूतेग्नावभावेन मथनप्र
योज्यत्वस्य च पाकनवनीतादावपि सत्वेनातिप्रसंगादरणिप्रयोज्याग्नित्वावांतरव्याप्यजातिवा
चित्वे प्राप्ते मथनप्रयोज्यत्वयोगेनैवोपपत्तौ उक्तरूढिकल्पने प्रमाणाभावादतिप्रसंगस्य च याका
दौ प्राचीनप्रयोगाभावेनैवाबाधकत्वोपपत्तेर्निराकर्तुं शक्यत्वान्नवनीते च वाच्य। तस्यापि वक्तुं

शाक्तत्वाद्यौगिकएवनिर्मंथ्यशब्दः।एवंचनिर्मंथ्येनेष्टकाइत्यत्राग्नेःपाकसामर्थ्याद्देवप्राप्तत्वान्मंथन
मात्रविधिरितितस्यापिप्रयोगमध्येकरणंसिद्धांतप्रयोजनंवैश्वदेवेचातुर्मास्येषुवैश्वदेवेप्रथमेपर्वणि
आग्नेयादीनष्टौयागान्विधायवैश्वदेवेनयजेतेतिश्रुतंतत्रवैश्वदेवशब्दोगुणविधिःकर्मनामधेयंवेतिचिंता
यांनामत्वेसमस्तवाक्यवैयर्थ्यप्रसंगादगत्याग्नेयादिषुसप्तसुदेवताविधिःआमिक्षायागेविश्वेदेवदेव
तायाःप्राप्तत्वात्।देवताविशिष्टकर्मांतरविधानंवागुणात्।एतस्मिन्नेववाकर्मणिच्यामिक्षावाक्येनद्रव्य
मात्रविधानं।एवंचाष्टौहवींषीतिलिंगदर्शनस्याप्युपपत्तिरितिप्राप्तेनाग्नेयादिषुगुणविधिःउत्पत्तिशि
ष्टदेवतावरोधात्।नापिकर्मांतरविधिःभेदबोधकप्रमाणानांनामत्वेनोपपत्तौविधिगौरवापादकभेद
बोधकत्वानुपपत्तेः।अतएवनामिक्षावाक्येपिद्रव्यमात्रविधानं।आग्नेयमष्टाकपालंनिर्वपेदित्या
ग्नेयादिवाक्यस्यनिर्वपेदित्यस्यविशिष्टविधायकस्यामिक्षावाक्येनुषक्तस्यद्रव्यमात्रविधायित्वे

रूप्यापत्तेश्चस्मत आग्नेयादीनामष्टानामपियागानांनामधेयंवैश्वदेवशब्दः ।उत्पत्तिशिष्टदेवताव
रोधसहकृततत्वस्यख्यन्यायात् ।प्रवृत्तिनिमित्तंचविश्वेदेवदेवताजन्यामिक्षायागप्रवृत्तिसमुदा
याश्रयत्वरूपं वाक्यंचसमुदायासिध्यर्थंसमुदायिनामनुवादकं तत्प्रयोजनंचाष्टानामपियागाना
वसंतेवैश्वदेवेनयजेतेतिवसंतादिसंबंधद्वाराचातुर्मास्यसंज्ञकत्वलाभेनफलसंबंधसिद्धिः ।इतर
थाआमिक्षायागस्यैवविश्वेदेवदेवताकत्वाद्वसंतादिसंबंधद्वाराचतुर्मास्यसंज्ञकत्वलाभेनफलसं
बंधापत्तेरितरेषामंगत्वापत्तेरितिकौस्तुभेस्पष्टं एवंवंतः वैश्वानरंद्वादशाकपालंनिर्वपेत्पुत्रेजातेइ
त्यनेनयागंविधाययदष्टाकपालोभवतिगायत्र्यैवैनंब्रह्मवर्चसेनपुनातिइत्यादिनाष्टाकपा
लनवकपालदशाकपालैकादशाकपालद्वादशाकपालानांफलान्यन्द्यांतेयस्मिन्जातएतामि
ष्टिंनिर्वपतिपूतएवसतेजस्व्यन्नादइंद्रियावीपशुमान्भवतीतिश्रुतं तत्रद्वादशत्वेऽष्टत्वा

देः प्राप्तत्वादष्टाकपालादिशब्दा वैश्वानरयागनामधेयमित्येकः पक्षः। स्वरूपेण प्राप्तावपि परिच्छेदकत्वेन प्राप्त्यभावा
द्गुणविधय एव एते अष्टत्वमष्टाकपालद्रव्यं वा इर्वयागे विधीयते उपक्रमोपसंहारैक्ये न चैकवाक्यत्वप्रतीतेर्न
द्वादशकपालस्योत्पत्तिशिष्टता। अथवा स्तुतवाक्यनानात्वं तथापि यद्द्वादशकपालो भवतीत्यनेनैव तद्विधिः।
वैश्वानरवाक्ये तत्पदमनुवाद एवेति द्वितीयः ब्रह्मवर्चसादिरूपफलोद्देशेन प्रकृतयागाश्रितगुणा एवाष्टाकपा
लादयो विधीयंत इति तृतीयः। सिद्धांतस्तु संभवत्येकवाक्यत्वे तद्भेदस्यान्याय्यत्वात्प्रकृतयागस्यैवेयं सर्वा स्तुतिः
यदंगभूतद्वादशकपालस्यावयवोऽष्टाकपालादिरप्येकैकफलसाधनं तत्र सर्वावयवोपेतद्वादशकपालस्य
सर्वफलप्रयोजकत्वे कः संदेह इति यागस्तुतिः। अष्टाकपालपदं चाग्नेयाष्टाकपाले शक्तं गौण्या वृत्त्या अ
ष्टत्वाश्रयकपालाश्रयितत्वसादृश्येन द्वादशकपालावयवे गौणं तेन चावयवद्वारावयवी द्वादशकपालो
लक्ष्यते तेन लक्षणया यागस्तुतिरिति। इदं चाधिकरणं औदुंबराधिकरणन्यायेन पुनरुक्तमपि शिष्य

क्षार्थमुक्तमिति ध्येयं॥ ॥तत्सिद्धिः॥ ॥यजमानः प्रस्तर इत्यादावपि सामानाधिकरण्यादेकमित
रस्य नामधेयं स्यात्तत्त्वेन तदसंभवाद्वाजघन्यप्रस्तरपदलक्षितप्रस्तरकार्यस्रुक्धारणोद्देशेन यजमानो
धिकरणत्वेन विधीयते इति प्राप्ते प्रत्यक्षविध्यश्रवणात् प्रस्तरमुत्तरं बर्हिषः सादयतीति विध्यंतरैकवा
क्यत्वाच्च तदर्थवादत्वमौदुंबराधिकरणसिद्धमेव यजमानपदं तु गौण्यावृत्त्या प्रस्तरस्तावकं। ननु अ
ध्यारोपेऽपि नार्थवृत्तित्वं गौणत्वं लोके प्रसिद्धं। सिंहत्वस्य देवदत्ते आहार्यारोपात्। न च तद्वेदे संभवति आरोप
कपुरुषाभावादिति चेन्न। विनाप्यारोपं सिंहशब्दस्य त्यादृश्यमात्रविवक्षया देवदत्ते काव्यलोकयोः प्रयो
गदर्शनात्। अतः स्वशक्यगुणसमानजातीयगुणयोगनिमित्तत्वं गौणत्वं सिंहनिष्ठक्रूरत्वसमानजाती
यक्रूरत्वयोगाच्च सिंहपदस्य देवदत्ते प्रवृत्तेः सिंहो देवदत्त इत्यत्र लक्षणसमन्वयः पुष्पादौ खसंबंधि
त्वाध्यारोपेण चारोपि परखपुष्पशब्दार्थमंगीकृत्य तद्वृत्तिगुणानामसत्वादानां सिद्धांते सत्वाच्च न ख

पुष्पंभवतु।सिद्धांतइत्यादावव्याप्तिः।अतश्चैतादृशगौणत्वस्यवेदेप्यस्त्येवसंभावः।यद्यपिचरूपकादिस्थलेऽसौं
दर्यस्यतरंगिणीत्यादौ आरोपेणापिगौणीइष्टातथापिसादृश्यमात्रेणापिउपमालंकारस्थलेसानुरूपमानानाप
क्तोतुंशक्या।अतश्चोभयसाधारण्येनस्वशक्यसमवेतवत्तागौणीवृत्तिः।समवेतत्वंचक्वचिदारोपितत्वसंबं
धेनक्वचिच्चस्वसमानजातीयगुणवत्तासंबंधेनेतिभेदः।अत्रचसिंहपदेनशक्तासिंहोपस्थित्यनंतरंलक्ष
णयाक्रूरत्वोपस्थितिरितिप्रांचः।वस्तुतस्तुएकसंबंधिदर्शनेनापरसंबंधिस्मरणमितिस्मारकविधयैवत
दुपस्थितिः।गौणीज्ञानकार्यतावच्छेदकंचनिरुक्तोभयविधसंबंधान्यतरसंबंधेनस्वशक्यसमवेतधर्म
प्रकारकत्वेवदत्तविशेष्यकशाब्दत्वमितिनक्रूरत्वादीनामशाब्दत्वप्रसंगः।नचगौण्यालक्षणातोनभे
दः।स्वशक्यवृत्तिगुणानामेवयत्रसंबंधत्वेनरूपेणबोधस्तत्रलक्षणाक्रूरत्वत्वादिनाबोधेतुगौणीतितयो २५
र्भेदात्।तेचगुणाः।षड्विधाः।क्वचित्तत्सिद्धिः।तत्कार्यकारित्वं।यथायजमानपदेयजमानोयथास्वका

र्यैकर्त्ता तथा प्रस्तरोपीति। एवं च गौणीगर्भे लक्षणया प्रस्तरस्तुतिः। एवं अन्येपि पंच गुणाःऽग्निमस्त्रे
द्रष्टव्याः॥ ॥जातिः॥ ॥अग्निर्वै ब्राह्मण इत्यत्र पूर्ववदेवाग्निशब्दो ब्राह्मणे गौणः द्वयोरप्यग्निब्राह्मण
योरेकमुखप्रभवत्वादग्निजननसमानजातीयजननमेवात्र गुणः॥ ॥सारूप्यं आदित्यो यूप इत्यादौ तु सा
रूप्यं गौणीनिमित्तं न च सर्वत्र तदेव निमित्तं कोत्र विशेषः। चक्षुर्ग्राह्यत्वं तेजस्वित्वाद्यत्र निमित्तमिति श्राचः
वस्तुतस्त्वन्यत्र शाक्तानिष्टगुणस्य स्वसमानजातीयगुणवत्तासंसर्गेण प्रकारत्वान्निमित्तता। न तु सा
रूप्यस्य तस्य संसर्गत्वात् इह तु शाक्तानिष्टगुणसजातीयगुणवत्त्वरूपसारूप्यस्यैव समवायादिसं
सर्गेणाप्रकारत्वात्तदेव निमित्तमिति विशेषः। प्रशंसा अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वा इ
त्यत्राजादीनां तत्र तत्र विहितत्वात्पशुकार्ये प्रतिषेधस्य पर्युदासस्य वानुपपत्तेरर्थवादत्वं अपशुशब्दो ह्य
टादौ मुख्यो गवाश्वगतप्राशस्त्याभावरूपगुणयोगादजादौ गौणः स न लक्षणया गवाश्वस्तुत्यर्थः प्रा

भा०
२६

चांमनेतुसमासांतर्गतपस्तुपदेनगवाश्वगतंप्राशस्त्यंलक्षयित्वानजातद्भावरूपोगुणउप
स्थाप्यतइतिविशेषः।सर्वथाप्रशंसागौणीनिमित्तघटिकेतिसिद्धं॥ ॥म्रमा॥ ॥सृष्टीरुपदधातीत्य
त्रविध्यंतरैकवाक्यत्वाभावात्प्रत्यक्षविधिश्रवणाच्चविधित्वं·तत्रचोपधानमेवेष्टकासंस्कारत्वेनविधीयते·
यद्यपिचेष्टकानांचयनांगत्वान्यथानुपपत्त्यैवोपधानंप्राप्येततथापिततःपूर्वमेवप्रत्यक्षविधिनावि
धीयते।तत्फलंचप्रत्येकोपधानसिद्धिश्चयनसमानकर्तृकत्वसिद्धिश्च।अन्यथासमुदितोपधानमपि
कदाचित्स्यात्क्रयात्·आर्थिकत्वाच्चचयनंनभिन्नकर्तृकत्वमपिसतितस्मिन्निष्टकासंस्कारद्वाराचयनां
गतावेधकविधौप्रतिप्रधानावृत्तिन्यायादंगप्रधानयोरेककर्तृकत्वाच्चफलद्वयसिद्धिः।सृष्टिपदंतुलिं
गप्रकरणप्राप्तसृष्ट्यसृष्टिमंत्रमात्रस्यगौण्यानुवादइतिभाष्यकारः।वार्त्तिककारस्तुनोपधानमात्रवि
धिस्तथासतिप्राणभृतउपदधातीत्याद्यनेकोपधानविधिवैयर्थ्यापत्तेः·अतोमंत्रमात्रमुपधानानु २६

20

वादेन मंत्रविशिष्टं चोपधानमिष्टकासंस्कारार्थत्वेन विधीयते । तत्रोपधानविधिफलं तु दृष्टमेव तु । मंत्रवि
धिफलं तु उपधाने तन्नियमः मंत्रा हि इष्टकामात्रप्रकाशकास्तद्ग्रहणादिष्वपि प्राप्तिसंभवात्सोपधाने नि
यमेन प्राप्नुवंति । अतस्तन्नियमो ग्रहणादिपरिसंख्यैव वा फलं । मध्यमचितिसंबंधश्च । यां वै कां च न ब्राह्मण
वतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादिति वचनेन प्रत्यक्षब्राह्मणवतीनामिष्ट
कानां मध्यमचितिसंबंधस्य विधानात् । अन्यथा तत्तच्चित्यवांतरप्रकरणपाठरहितानां मंत्राणां व
पनमहाप्रकरणेन सर्वचितिषु अंतिमायामेव वा निवेशापत्तेः अतो मध्यमचितिसंबंधार्थं मंत्रवि
धिः । इष्टकानां प्रत्यक्षब्राह्मणवत्त्वं चेष्टकावाचि प्रत्यक्षब्राह्मणपठितपदविधेयमंत्रकत्वं स्व
ष्टिपदं हि स्वष्टिप्रकाशकमंत्रोपधेयेष्टकापरं तत्र च विशेषणांशस्य मंत्रस्य विधेयत्वात्तदिष्टकानां प्र
त्यक्षब्राह्मणवत्त्वसिद्धिः । इतिकरणाविनियुक्तलोकंपृणमंत्रस्यापि मध्यमचितिमात्रसंबंधापत्तेरि

ष्टकावाचीतिपदशब्दविशेषणं अतश्च मंत्रविशिष्टोपधानमत्र विधीयते। सृष्टिपदं परं गौ
ण्याद्वृत्त्यासप्तदशसंख्याकसृष्टयः सृष्टिमंत्रपरं पत्सप्तदशेष्टकाउपदधातीत्यर्थवादानुसा
रात्‌। तत्र चतुर्दश सृष्टिमंत्रास्त्रयः सृष्टिमंत्राइति। सृष्टिवाहुल्यं गुणो गौणीवृत्तिनिमित्तं॥ ॥लिंग
समवायात्॥ ॥प्राणभृतउपदधातीत्यादौ तु अल्पत्वं निमित्तं शेषं पूर्ववत्। एवं षट् गौणीवृत्तिप्रका
राः॥ ॥संदिग्धेषु॥ ॥अक्ताः शर्करा उपदधातीत्यत्राक्ता इत्यनेनाविशेषाद्घृतं किंचिदंजनसाधनद्रव्य
स्य विधिना निर्णीतत्वादुपसंहारस्थेन तेजो वै घृतमित्यर्थवादेन संकोचानुपपत्तेर्नार्थवादस्य सं
दिग्धार्थनिर्णये प्रामाण्यमिति प्राप्ते विधेरविशेषप्रवृत्तत्वेनैव घृतमात्रग्रहणोपपत्तेरिति राक्षेप
कत्वे प्रमाणाभावादुपक्रमस्याविरोधेनोपपत्तौ च उपसंहारस्थस्याप्यर्थवादस्योपलक्षणत्वे प्रामाण्या
भावाद्विध्यर्थवादयोरेकवाक्यत्वेनैकविषयत्वस्यावश्यकत्वाच्च युक्तं वाक्यशेषस्य संदिग्धार्थनिर्णये २७

भा० २८

पिप्रामाण्यमिति घटतेनैवांजनं॥ ॥अर्थोद्दा॥ ॥स्रुवेणावद्यतिस्वधितिनावद्यतिहस्तेनावद्यतिइत्या
द्यौविधेरवदेपद्रव्यविषयेसंदिग्धस्यसामर्थ्यान्निर्णयः।स्रुवेणाद्रवमेवाज्यादिस्वधितिनामांमा
दिहस्तेनसंहतंपुरोडाशादिअतश्चसामर्थ्यसहकृतनावद्यतिपदेनैवलक्षणयाद्रवाद्यवदान
स्यउद्देश्यत्वात्तदनुवादेनस्रुवादिविधोनकिंविद्बाधकं।एवंअंजलिनासक्तून्जुहोतीत्यादाव
पिनसंघुटाकारेंजलिः।अपितुव्याकोशात्मकएवसामर्थ्यात्।तदेवंविध्यर्थवादमंत्रस्मृत्याचा
रनामधेयवाक्यशेषसामर्थ्यरूपाण्यष्टौप्रमाणानिधर्माधर्मयोर्निरूपितानिअतःपरंभेदादिना
तत्स्वरूपंनिरूपयिष्यते॥ ॥इतिश्रीखंडदेवविरचितायांभाट्टदीपिकायांप्रथमाध्यायस्यचतुर्थःपादः।

२४